श्री प्रत्यंगिरा आपन्निवारण स्तुतिः

श्री प्रत्यंगिरा आपन्निवारण स्तुतिः

प्रत्यंगिरे महाकृत्ये दुस्तरापन्निवारिणि ।
सकलापन्निवृत्तिं मे सर्वदा कुरु सर्वदे ॥1॥

प्रत्यंगिरे जगन्मातर्जयश्री परमेश्वरि ।
तीव्रदारिद्र्यदुःखं मे क्षिप्रमेव हरांबिके ॥2॥

प्रत्यंगिरे महामाये भीमे भीमपराक्रमे ।
मम शत्रूनशेषांस्त्वं दुष्टान्नाशय नाशय ॥3॥

प्रत्यंगिरे महदेवि ज्वालामालोज्ज्वलानने ।
क्रूरग्रहानशेषान् त्वं दह खादाग्निलोचने ॥4॥

प्रत्यंगिरे महाघोरे परमंत्रांश्च कृत्रिमान् ।
परकृत्या यंत्र तंत्रजालं छेदय छेदय ॥5॥

प्रत्यंगिरे विशालाक्षि परात्परतरे शिवे ।
देहि मे पुत्रपौत्रादि पारंपर्योच्छ्रितां श्रियं ॥6॥

प्रत्यंगिरे महादुर्गे भोगमोक्षफलप्रदे ।
सकलाभीष्टसिद्धिं मे देहि सर्वेश्वरेश्वरि ॥7॥

प्रत्यंगिरे महादेवि महादेवमनःप्रिये ।
मंगळं मे प्रयच्छाशु मनसा त्वां नमाम्यहं ॥8॥

इति श्री प्रत्यंगिरा आपन्निवारण स्तुतिः ।